## तपःसहस्राभ्यां विनीनी । (१०२/१९०९)

तपःसहस्रशब्दाभ्यां [1]विनि इनि इत्येतौ प्रत्ययौ भवतः मत्वर्थे । प्रत्ययार्थयोस्तु यथासङ्ख्यं [2]सर्वत्रैवास्मिन् प्रकरणे नेष्यते । तपोऽस्य अस्मिन् वा विद्यते तपस्वी । सहस्री । असन्तत्वाद[3]दन्तत्वाच्च सिद्धे [4]प्रत्यये (५.२.१२१, ११५/१९२८, १९२२) पुनर्वचनम् [5]अणा (५.२.१०३/१९१०) [6]वक्ष्यमाणेन बाधा मा भूत् इति । सहस्रात् तु ठन् अपि बाध्यते ॥

## अण् च । (१०३/१९१०)

तपःसहस्राभ्याम्[7] अण् च प्रत्ययो भवति[8] । तापसः । साहस्रः । योगविभाग उत्तरार्थः, यथासङ्ख्यार्थश्च ।

[५७६] अण्प्रकरणे ज्योत्स्नादिभ्य उपसङ्ख्यानम्[9] । (म.भा. २.३९७)

ज्योत्स्ना विद्यतेऽस्मिन् पक्षे ज्यौत्स्नः पक्षः । तामिस्रः । [10]कौण्डलः । कौतपः । वैसर्पः । वैपादिकः ॥

## सिकताशर्कराभ्यां च । (१०४/१९११)

सिकताशर्कराभ्याम् अण् प्रत्ययो भवति मत्वर्थे । [11]सैकतो घटः । शार्करं मधु । अदेशे इहोदाहरणम् । देशे [12]तु लुबिलचौ भविष्यतः ॥

## देशे लुबिलचौ च । (१०५/१९१२)

सिकताशर्कराभ्यां देशेऽभिधेये लुबिलचौ भवतः । चकाराद् अण् च, मतुप् च । कस्य पुनरयं लुप् ? मतुबादीनामन्यतमस्य, विशेषाभावात् । सिकता अस्मिन्[13]विद्यते सिकता देशः, सिकतिलः, सैकतः, सिकतावान् । [14]एवं शर्करा देशः, शर्करिलः, शार्करः, शर्करावान् । देशे इति किम् ? सैकतो घटः । [15]शार्करं मधु[16] ॥

## दन्त उन्नत उरच् । (१०६/१९१३)

[17]उन्नत इति प्रकृतिविशेषणम् । दन्तशब्दाद् उन्नतोपाधिकाद् उरच् प्रत्ययो भवति मत्वर्थे । दन्ता उन्नता अस्य सन्ति दन्तुरः । उन्नत इति किम् ? दन्तवान् ॥

## ऊषसुषिमुष्कमधो रः । (१०७/१९१४)

ऊष सुषि मुष्क मधु इत्येतेभ्यो रः प्रत्ययो भवति मत्वर्थे । ऊषरं क्षेत्रम् । सुषिरं काष्ठम् । मुष्करः

---

1. यथासंख्यम् इत्यधिकम् ब. ड. 2. सर्वस्मिन्नेवाच्प्रकरणे क. 3. अदन्तत्वात् च नास्ति फ. 4. एव क. 5. अणो बाधा मा भूत् क. 6. वक्ष्यमाणेन नास्ति ब. क. फ. 7. शब्दाभ्याम् इत्यधिकम् फ. 8. मत्वर्थे इत्यधिकम् ब.क.ड. 9. कर्तव्यम् इत्यधिकम् क. 10. कौमण्डलः क.फ, कौण्डिनः ग. 11. सैकतम् शार्करं मधु ह. 12. तु नास्ति क. 13. देशे इत्यधिकम् फ. 14. एवं नास्ति क. 15. शार्करं मधु नास्ति क. 16. इति इत्यधिकम् क. 17. उन्नतग्रहणम् क.फ.